-: ओ३म् :-

कक्षा - IX

## द्वितीयः पाठः - स्वर्णकाकः

### अभ्यासः

1: अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृत भाषया लिखत -

(क) निर्धनायाः वृद्धायाः दुहिता कीदृशी आसीत् ?

उत्तर - निर्धनायाः वृद्धायाः दुहिता विनम्रा मनोहरा च आसीत् ।

(ख) बालिकया पूर्वं किं न दृष्टम् आसीत् ?

उत्तर - बालिकया पूर्वं स्वर्णपक्षः रजतचञ्चुः स्वर्णकाकः न दृष्टः आसीत् ।

(ग) रुदन्तीं बालिकां काकः कथम् आश्वासयत् ?

उत्तर - रुदन्तीं बालिकां काकः आश्वासयत् अकथयत् च, "सूर्योदयात् प्राग् ग्रामात् बहिः पिप्पलवृक्षम् अनु त्वया गन्तव्यम् । अहं तुभ्यं तण्डुलमूल्यं दास्यामि ।"

(घ) बालिका किं दृष्ट्वा आश्चर्यचकिता जाता ?

उत्तर - बालिका वृक्षस्योपरि स्वर्णमयम् प्रासादं दृष्ट्वा आश्चर्यचकिता जाता ।

(ङ) बालिका केन सोपानेन स्वर्णभवनम् आससाद ?

उत्तर - बालिका स्वर्णसोपानेन स्वर्णभवनम् आससाद ।

(च) सा ताम्रस्थाल्याः चयनाय किं तर्कं ददाति ?

उत्तर - सा ताम्रस्थाल्याः चयनाय तर्कं ददाति यत् सा निर्धनमातुः पुत्री अस्ति ।

(छ) गर्विता बालिका कीदृशं सोपानम् अयाचत् कीदृशं च प्राप्नोत् ।

उत्तर - गर्विता बालिका स्वर्णमयं सोपानम् अयाचत् परम् ताम्रमयं सोपानम् प्राप्नोत् ।

2. (क) अधोलिखितानां शब्दानां विलोमपदं पाठात् चित्वा लिखत -

(i) पश्चात् — पूर्वम्

(ii) हसितुम् — रोदितुम्

(iii) अधः — उपरि

(iv) श्वेतः — कृष्णः
(v) सूर्यास्तः — सूर्योदयः
(vi) सुप्तः — प्रबुद्धः

(ख) सन्धिं कुरुत —
(i) नि + अवसत् — न्यवसत्
(ii) सूर्य + उदयः — सूर्योदयः
(iii) वृक्षस्य + उपरि — वृक्षस्योपरि
(iv) हि + अकारयत् — ह्यकारयत्
(v) च + एकाकिनी — चैकाकिनी
(vi) इति + उक्त्वा — इत्युक्त्वा
(vii) प्रति + अवदत् — प्रत्यवदत्
(viii) प्र + उक्तम् — प्रोक्तम्
(ix) अत्र + एव — अत्रैव
(x) तत्र + उपस्थिता — तत्रोपस्थिता
(xi) यथा + इच्छम् — यथेच्छम्

**3.** स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत —
(क) ग्रामे निर्धना स्त्री अवसत्।
उत्तर - ग्रामे का अवसत् ?
(ख) स्वर्णकाकं निवारयन्ती बालिका प्रार्थयत्।
उत्तर - कम् निवारयन्ती बालिका प्रार्थयत् ?
(ग) सूर्योदयात् पूर्वमेव बालिका तत्रोपस्थिता।
उत्तर - कस्मात् पूर्वमेव बालिका तत्रोपस्थिता ?
(घ) बालिका निर्धनमातुः दुहिता आसीत्।
उत्तर - बालिका कस्याः दुहिता आसीत् ?
(ङ) लुब्धा वृद्धा स्वर्णकाकस्य रहस्यमभिज्ञातवती।
उत्तर - लुब्धा वृद्धा कस्य रहस्यमभिज्ञातवती।

AVANISH SANSKRIT

4. प्रकृति - प्रत्यय - संयोग कुरुत (पाठात् चित्वा वा लिखत)

(क) हस् + शतृ - हसत्
(ख) भक्ष् + शतृ - भक्षयत्
(ग) वि + लोक् + ल्यप् - विलोक्य
(घ) नि + क्षिप् + ल्यप् - निक्षिप्य
(ङ.) आ + गम् + ल्यप् - आगत्य
(च) दृश् + क्त्वा - दृष्ट्वा
(छ) शी + क्त्वा - शयित्वा
(ज) वृद्ध + टाप् - वृद्धा
(झ) सुत + टाप् - सुता
(ञ) लघु + तमप् - लघुतमः

5. प्रकृतिप्रत्यय - विभागं कुरुत -

(क) हसन्तम् - हस् + शतृ
(ख) रोदितुम् - रुद् + तुमुन्
(ग) वृद्धा - वृद्ध + टाप्
(घ) भक्षयन् - भक्ष् + शतृ
(ङ.) दृष्ट्वा - दृश् + क्त्वा
(च) विलोक्य - वि + लोक् + ल्यप्
(छ) निक्षिप्य - नि + क्षिप् + ल्यप्
(ज) आगत्य - आ + गम् + ल्यप्
(झ) शयित्वा - शी + क्त्वा
(ञ) सुता - सुत + टाप्
(ट) लघुतमम् - लघु + तमप्

6. अधोलिखितानि कथनानि कः/का, कं/काम् च कथयति -

| कथनानि | कः/का | कं/काम् |
| --- | --- | --- |
| (क) पूर्वं प्रातराशः क्रियताम्। | काकः | बालिकाम् |
| (ख) सूर्यातपे तण्डुलान् खगेभ्यो रक्ष। | माता | पुत्रीम् |
| (ग) तण्डुलान् मा भक्षय। | बालिका | काकम् |
| (घ) अहं तुभ्यं तण्डुलमूल्यं दास्यामि। | काकः | बालिकाम् |
| (ङ.) भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ। | वृद्धायाः पुत्री | काकम् |

7. उदाहरणमनुसृत्य कोष्ठकगतेषु पदेषु पञ्चमीविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत -

यथा - मूषकः बिलात् बहिः निर्गच्छति। (बिल)

(क) जनः ग्रामात् बहिः आगच्छति। (ग्राम) (ख) नद्यः पर्वतात् निस्सरन्ति। (पर्वत)
(ग) वृक्षात् पत्राणि पतन्ति (वृक्ष) (घ) बालकः सिंहात् बिभेति। (सिंह)
(ङ.) ईश्वरः क्लेशात् त्रायते (क्लेश) (च) प्रभुः भक्तं पापात् निवारयति। (पाप)

-: इति :-

AMAN SIR (SANSKRIT)